# श्री महालक्ष्मी अष्टकम

## ॐ श्री गणेशाय नमः

श्री इन्द्र उवाच

नमस्तेस्तु महामाये श्रीपीठे सुरपूजिते | शंखचक्रगदाहस्ते महालक्ष्मी नमोस्तुते || 1 ||

नमस्ते गरुड़ारूढे कोलासुरभयंकरि | सर्वपापहरे देवी महालक्ष्मी नमोस्तुते || 2 ||

सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरी | सर्व दुःखहरे देवी महालक्ष्मी नमोस्तुते || 3 ||

सिद्धिबुधिप्रदे देवी भुक्तिमुक्तिप्रदायिनी | मंत्रमुर्ते सदा देवी महालक्ष्मी नमोस्तुते || ४ ||

आद्यन्तरहिते देवी आद्यशक्तिमहेश्वरी | योगये योगसम्भूते महालक्ष्मी नमोस्तुते || 5 ||

स्थूलसूक्ष्म महारौद्रे महाशक्तिमहोदरे | महापापहरे देवि महालक्ष्मी नमोस्तुते || 6 ||

पद्मासनस्थिते देवी परब्रम्हास्वरूपिणि | परमेशि जगन्मातारमहालक्ष्मी नमोस्तुते || 7 ||

श्वेताम्बरधरे देवी नानालङ्कारभुषिते | जगतस्थिते जगन्मातारमहालक्ष्मी नमोस्तुते || 8 ||

महालक्ष्मीअष्टकम स्तोत्रम् यः पठेत्भक्तिमानरः | सर्वसिद्धिमवापनोति राज्यम प्राप्नयोति सर्वदा || 9 ||

एककालं पठेनित्यम महापापविनाशनं | द्विकालं यः पठेनित्यम धनधान्यसमन्वितः || 10 ||

त्रिकालं यः पठेनित्यम महाशत्रुविनाशनम | महालक्ष्मिरभवेर्नित्यं प्रसन्ना वरदा शुभा || 11 ||

**|| श्री लक्ष्मीमात की जय ||**

www.hanumanchalisalyric.com